## SAN202 (दर्शनम्)

# सांख्यदर्शने पञ्चविंशतितत्त्वानां परिचयः

सांख्यदर्शनं तावद् महर्षिकपिलेन प्रणीतं दर्शनं वर्तते। अस्य प्रकरणग्रन्थः सांख्यकारिका यस्य च कर्ता आचार्य-ईश्वरकृष्णो वर्तते। सांख्यदर्शनानुसारं तत्त्वानि पञ्चविंशति विद्यन्ते। अस्य क्रमः अधो निर्दिष्टः -




पुरुषस्तु पञ्चविंशतितत्त्वेषु समागमनेनापि भिन्न एव, यश्च अस्माभिः ज्ञतत्त्वेन अभिधीयते। एतेषु कानिचित् प्रकृतिरूपेण विराजन्ते, तेषु मूलप्रकृतिरथवा प्रधानम् अविकृतिरेव तत्पश्चात् महत्, अहङ्कारः, पञ्चतन्मात्राणि च प्रकृति-विकृतिरेव वर्तन्ते। षोडकस्तु अर्थात् पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, पञ्चमहाभूतानि च विकारा एव अर्थात् एते नोत्पादयन्ति अपितु उत्पद्यन्त एव। पुरुषतत्त्वं प्रकृतिरपि न विकृतिरपि न अर्थात् त्रिकालाबाधितत्त्वं वर्तते पुरुषः।

तत्र मङ्गपद्यम् आचरति ग्रन्थकर्ता-

**दुःखत्रयाविघाताज्जिज्ञासा तदपघातके हेतौ।**

**दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात्।।**

**अर्थात्- त्रयाणां दुःखानां समूह इति दुःखत्रयम् अथवा आध्यात्मिकम्, आधिभौतिकम् आधिदैविकञ्च।**
आत्मनि भवम् अध्यात्मम् अर्थात् स्वस्मिन् यद्दुःखं समुत्पद्यते तद्दुःखम् अध्यात्मम् तेन सम्बद्धम् आध्यात्मिकमिति।

**आध्यात्मिकं दुःखम्**

१. शारीरिकम् २. मानसिम्

१. तत्र शारीरिकं दुःखं नाम वाद-पीत्त-कफ्फजनीतदुःखम् (यथा- ज्वरः, उदरविकारः उदरवेदना वा शिरोवेदनेत्यादयः)
२. मानसिकं दुःखम्-
   क. प्रियाद् वियोगः।
   ख. अप्रियेण संयोगः।

आधिभौतिकं दुःखं नाम भूतादिभ्यो यद्दुःखं समुत्पद्यते, तद्दुःखम् आधिभौतिकमिति, यथा- सर्पदंशनम्, कीटादिभिः कर्तनम्, स्वानकर्तनमित्यादयः।

आधिदैविकं दुःखं नाम दैविकप्रकोपेन यद्दुःखं समुत्पद्यते, तद्दुःखम् आधिदैविकमिति, यथा- भूकम्पः, जलोप्लवः, हिमस्खलनम्, अतिवृष्टिः, खण्डवृष्टिः, ज्वालामुखी इत्यादयः।

तर्हि एतेषां त्रयाणां दुःखानाम् आघातेन अर्थात् एतेषां वारं-वारं जीवने समागमनेन अस्माकं मनसि एका जिज्ञासा समुत्पद्यते यत् कथम् एतेषां दुःखानां विनाशो भवेत् कथञ्च अस्माकं कल्याणं भवेत्, तत्र सामान्योपायेनापि एतेषां दुःखानां विनाशो भवितुं नार्हति। यदि एवम् अस्ति चेत् तत्र कारणद्वयादेव. एकं तु ऐकान्तिकाभावात् अथवा दुःखनाशः सद्य एव भवेत् उपायः तादृशो भवेन्येन एकस्मिन् समये एव दुःखनाशेन अस्माकं कल्याणं भवेत्. किन्तु एवं न भवति तद् ऐकान्तिकस्याभावादेव। अपरं कारणं विद्यते- आत्यन्तिकः, दुःखे नाशे तस्य पुनर्न उत्पत्तिर्जायेत। एतयोः द्वयोः कारणयोरभावात् अस्माकं दुःखविनाशो न सम्भवः।